[७३४] कुक्कुटयादीनामण्डादिषु पुंवद्भावो वक्तव्यः । (म. भा. ३.१५७)

कुक्कुटयाः अण्डम् कुक्कुटाण्डम् । मृग्याः पदम् मृगपदम् । मृग्याः क्षीरम् मृगक्षीरम् । काक्याः शावः काकशावः । न वा अस्त्रीपूर्वपदस्य विवक्षितत्वात् (म. भा. ३.१५७) । स्त्रीत्वेन विना पूर्वपदार्थोऽत्र जातिः सामान्येन विवक्षितः । पुंवद्भावात् ह्रस्वत्वं [1]खिद्घादिषु भवति विप्रतिषेधेन (म. भा. ३.१५८) ।

खित् – कालिम्मन्या । हरिणिम्मन्या । घादि – पट्वितरा । पट्वितमा । पट्विरूपा । पट्विकल्पा । क – पट्विका । मृद्विका । इह इडबिड्, दरद्, पृथु, उशिज् इत्येते जनपदशब्दाः क्षत्रियवाचिनः, तत्र तद्राजप्रत्ययस्य स्त्रियामतश्च (४.१.१७७/११९६) इति लुकि कृते [2]इडबिडवृन्दारिका इति विगृह्य समासः क्रियते । ततः पुंवद्भावेन ऐडबिडादयः पुंशब्दाः क्रियन्ते । ऐडबिडवृन्दारिका । औशिजवृन्दारिका[3] ॥

## घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः । (४३/९८५)

[4]घ रूप कल्प चेलट् ब्रुव गोत्र मत हत इत्येतेषु परतो भाषितपुंस्कात् परो यो ङीप्रत्ययस्तदन्तस्यानेकाचो ह्रस्वो भवति । घ – ब्राह्मणितरा । ब्राह्मणितमा । रूप – ब्राह्मणिरूपा । कल्प – ब्राह्मणिकल्पा । चेलट् – ब्राह्मणिचेली । ब्रुव – ब्राह्मणिब्रुवा । गोत्र – ब्राह्मणिगोत्रा । मत – ब्राह्मणिमता । हत – ब्राह्मणिहता । घरूपकल्पाः प्रत्ययाश्चेलडादीन्युत्तरपदानि । ब्रुव इति ब्रवीति इति ब्रुवः पचाद्यचि, [5]वच्यादेशो गुणश्च निपातनान्न भवति । ङ्यः इति किम् ? दत्तातरा । गुप्तातरा । अनेकाचः इति किम् ? 'नद्याः शेषस्यान्यतरस्याम्' (६.३.४४/९८६) इति वक्ष्यति । भाषितपुंस्कादित्येव, आमलकीतरा । कुवलीतरा ॥

## नद्याः शेषस्यान्यतरस्याम् । (४४/९८६)

नद्याः शेषस्य घादिषु परतो ह्रस्वो भवति अन्यतरस्याम् । कश्च शेषः ? अङी [6]च या नदी ङ्यन्तं च यदेकाच् । ब्रह्मबन्धूतरा, ब्रह्मबन्धुतरा[7] । [8]वीरबन्धूतरा । वीरबन्धुतरा । [9]स्त्रितरा, स्त्रीतरा । स्त्रितमा, स्त्रीतमा ।

[७३५] कृन्नद्याः प्रतिषेधो वक्तव्यः ।

लक्ष्मीतरा । [10]तन्त्रीतरा ॥

## उगितश्च । (४५/९८७)

उगितश्च परस्याः नद्याः घादिषु अन्यतरस्यां ह्रस्वो भवति । श्रेयसितरा, श्रेयसीतरा, श्रेयस्तरा[11] । विदुषितरा, विदुषीतरा, विद्वत्तरा । पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः । प्रकर्षयोगात् प्राक् स्त्रीत्वस्याविवक्षितत्वाद्वा सिद्धम् ॥

---

1. खितघादिकेषु ड. ह. 2. इडबिट् चासौ वृन्दारिका च इत्यधिकम् ब. 3. दारदवृन्दारिका पार्थवृन्दारिका इत्यधिकम् ब. 4. घादिषु फ. 5. वच् आदेशः ब. 6. च नास्ति फ. 7. धीवरीबन्धूतरा धीवरीबन्धुतरा इत्यधिकम् क. 8. उदाहरणमिदं नास्ति फ. ह. 9. उदाहरणमिदं नास्ति क. 10. लक्ष्मीतमा फ. ह. 11. श्रेयसीतमा श्रेयसितमा श्रेयस्तमा इत्यधिकम् फ.